
# राजस्थान बोर्ड की तैयारी के लिए आज ही हमारे YouTube चैनल Board Zone और Website BoardZone.in से जुड़ें।




- Chapter-wise PYQ
- Handwritten Notes
- MCQ
- Blue Print
- Model Paper
- Strategy
- etc

WHATSAPP YOUTUBE INSTAGRAM

921-6765-400

www.boardzone.in

Contact us : contact@boardzone.in

अनुक्रमांक (अंकों में) / Roll No. (in figures) :

अनुक्रमांक (शब्दों में) / Roll No. (in words) :

[कुल प्रश्नों की संख्या : 18] [Total No. of Questions : 18]
[कुल मुद्रित पृष्ठ : 04] [Total No. of Printed Pages : 04]

[समय : 3.15 घंटे] [Time: 3.15 Hours]
[पूर्णांक : 70] [Maximum Marks : 70]

# कक्षा 10वीं अर्द्ध वार्षिक परीक्षा, 2024–25
# Class 10th Half Yearly Examination, 2024-25
## संस्कृत / SANSKRIT
## [ 1006 ]

**सामान्य अनुदेश :**
1) परीक्षार्थी प्रश्न–पत्र के पहले पृष्ठ पर अपना अनुक्रमांक अवश्य लिखे।
2) प्रत्येक प्रश्न के सामने उसका अंक भार अंकित है।

**General Instructions :**
1) Candidate must write his/her Roll Number on the first page of the Question Paper.
2) Marks for every question are indicated alongside.

**'खण्ड – अ'**

Q.1 अधोलिखित प्रश्नानाम् उचितं विकल्पं चिनुत –

(i) 'व्याघ्रः' कस्मात् बिभेति? (1)
(अ) जम्बुकात् (ब) मानुषात् (स) शृगालात् (द) काननात्

(ii) वृषभ कुत्र पपात? (1)
(अ) क्षेत्रे (ब) गृहे (स) ग्रामे (द) आकाशे

(iii) गुणी किं वेत्ति? (1)
(अ) बलम् (ब) दोषम् (स) गुणम् (द) अबलम्

(iv) वनराजः कैः दुरावस्थां प्राप्तः? (1)
(अ) काकैः (ब) मयूरैः (स) बकैः (द) वानरैः

(v) कृशकायः कः आसीत्? (1)
(अ) न्यायाधीशः (ब) अतिथिः (स) चौरः (द) आरक्षी

(vi) 'वागीशः' इत्यस्य सन्धि–विच्छेदं चिनुत – (1)
(अ) वागी+शः (ब) वा+गीशः (स) वाक्+ईशः (द) वाग्+ईशः

(vii) 'कृष्णस्य समीपम्' इत्यस्य समस्तपदं वर्तते – (1)
(अ) उपकृष्णम् (ब) अनुकृष्णम् (स) अवकृष्णम् (द) अधिकृष्णम्

(viii) 'पठ+शतृ' किं भवेत्? (1)
(अ) पठनम् (ब) पठम् (स) पठतः (द) पठन्

(ix) 'अपहरति' इत्यत्र कः उपसर्गः? (1)
(अ) अति (ब) अप (स) अभि (द) अव

(x) उत्तमपुरुषस्य-पदं वर्तते – (1)
(अ) लिखति (ब) लिखतम् (स) लिखाव (द) लिख

2 निर्देशानुसारं रिक्तस्थानानि पूरयत –

(i) .................... सह सीता वनं गच्छति। (रामशब्दस्य तृतीया एकवचनम्) (1)

(ii) अन्येऽपि पशवः भयभीताः .................... । (भू धातु–लङ् लकार प्रथमपुरुष बहुवचनम्) (1)

(iii) ग्रामं.................... तृणं स्पृशति। (गम् (गच्छ) + शतृ) (1)

(iv) मोहनः .................... गां ददाति। (हरि शब्द चतुर्थी एकवचनम्) (1)

(v) एका.................... पादपं खादति। (अज + टाप्) (1)

(vi) शिष्यः विद्यालये ज्ञानं.................... । (लभ् धातु – लट्लकार प्रथमपुरुष एकवचनम्) (1)

प्र.3 अधोलिखितम् अपठितगद्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत – (8)

मानवस्य बौद्धिकविकासाय ज्ञानवर्धनाय च पुस्तकालयानां महत्त्वपूर्णं स्थानं वर्तते। पुस्तकालयेषु विविधपुस्तकानां संग्रहो भवति। अत्र विविधभाषाणां पत्र–पत्रिकादयोऽपि प्रतिदिनम् आयान्ति। अस्माकं पुस्तकालयः नगरस्य समीपे रमणीये स्थाने वर्तते। अस्मिन् दशसहस्राणि पुस्तकानि सन्ति। अस्माकं पुस्तकालये हिन्दी–आंग्ल–संस्कृतभाषाणां पत्र–पत्रिकाः प्रतिदिनम् आयान्ति। अस्य समीपे एकः वाचनालयः वर्तते। यत्र बहवः जनाः छात्राः युवतयश्च प्रतिदिनम् आगत्य स्वाध्यायं कुर्वन्ति। अस्माकं पुस्तकालयस्य भवनं विशालं रमणीयञ्च वर्तते। अस्य पुस्तकालयस्य सर्वे जनाः प्रशंसां कुर्वन्ति। अस्माकं ज्ञानवर्धनाय अस्य महती भूमिका वर्तते। अयम् एकः आदर्शः पुस्तकालयः विद्यते।

(i) एकपदेन उत्तरत –
   (i) पुस्तकालयेषु केषां संग्रहो भवति? (1)
   (ii) कस्य समीपे वाचनालयः वर्तते? (1)

(ii) पूर्णवाक्येन उत्तरत –
   (i) अस्माकं पुस्तकालयः कुत्र वर्तते? (2)
   (ii) सर्वे जनाः पुस्तकालयस्य किं कुर्वन्ति? (2)

(iii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (1)

(iv) निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।
   (i) 'आदर्शः' इति विशेषणस्य गद्यांशात् विशेष्यपदं चित्वा लिखत। (½)
      (अ) विद्यालयः (ब) वाचनालयः (स) भवनं (द) पुस्तकालयः
   (ii) 'निन्दाम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। (½)
      (अ) प्रशंसाम् (ब) विशालम् (स) दुःखम् (द) हर्षम्

## 'खण्ड – ब'

प्र.4 अधोलिखित शब्दयोः सन्धि–विच्छेदं लिखत। (1×2=2)

(i) तपोवनम् (ii) कोऽपि

प्र.5 अधोलिखित समस्तपदयोः समास–विग्रहं लिखत। (1×2=2)

(i) अनुरथम् (ii) पुरुषसिंहः

प्र.6 उचितम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत। (1×2=2)

(i) विद्यालयं ...................... वृक्षाः सन्ति। (परितः / उपरि)
(ii) गच्छतु भवान्! ...................... मिलावः। (खलु / पुनः)

प्र.7 निम्नलिखित पदयोः प्रयुक्तौ उपसर्गौ लिखत – (1×2=2)

(i) अध्यक्षः (ii) दुर्जनः

प्र.8 रेखांकित पदयोः प्रश्ननिर्माणं कृत्वा लिखत। (1×2=2)

(i) सः कृच्छ्रेण भारम् उद्वहति। (ii) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

प्र.9 अधोलिखित श्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत – (½×4=2)

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।।

मञ्जूषा – दुर्लभः, नास्ति, अक्षरम्, अयोग्यः

अन्वयः –
अमन्त्रम् (i).................... नास्ति, अनौषधम् मूलं (ii)....................
(iii).................... पुरुषः नास्ति, तत्र योजकः (iv)....................।

प्र.10 स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। (1×2=2)

प्र.11 'बुद्धिर्बलवती सदा' इति पाठसारं हिन्दीभाषायां लिखत। (2×1=2)

## 'खण्ड – स'

प्र.12 अधोलिखितं गद्यांशं पठित्वा एतदाधारितम् प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत – (4)

"कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन–गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत्। तथापि वृषः नोत्थितः।"

(क) एकपदेन उत्तरत –

(i) कृषकः कया क्षेत्रकर्षणं कुर्वन्नासीत्? (½)

(ii) क्रुद्धः कृषकः कम् उत्थापयितुं यत्नमकरोत्? (½)

(ख) पूर्णवाक्येन उत्तरत –

(i) बलीवर्दयोः एकः कीदृशः आसीत्? (1)

(ii) कृषकः कं तोदनेन नुद्यमानः अवर्तत? (1)

(ग) निर्देशानुसारम् उत्तरत –

(i) 'बलवान्' इति पदस्य विलोमपदं गद्यांशे चित्वा लिखत। (½)

(ii) 'बलीवर्दः' इति पदस्य पर्यायपदं गद्यांशे चित्वा लिखत। (½)

अधोलिखितं श्लोकं पठित्वा निम्न प्रश्नानाम् उत्तराणि लिखत – (4)

हरिततरूणां ललितलतानां माला रमणीया।
कुसुमावलिः समीरचालिता स्यान्मे वरणीया।।
नवमालिका रसालं मिलिता रुचिरं संगमनम्।।

(क) एकपदेन उत्तरत –

(i) हरिततरूणां माला कीदृशी? (½)

(ii) नवमालिका कम् मिलिता? (½)

(ख) पूर्णवाक्येन उत्तरत –

(i) का रसालं मिलिता? तयोः संगमनं कीदृशं जातम्? (1)

(ii) कुसुमावलिः कीदृशी अस्ति? (1)

(ग) यथानिर्देशम् उत्तरं लिखत –

(i) 'माला' इति पदस्य विशेषणपदं किम्? (½)

(ii) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्? (½)

अधोलिखितं नाट्यांशं पठित्वा निम्न प्रश्नानाम् उत्तराणि लिखत– (4)

अहं प्रकृतिः युष्माकं सर्वेषां जननी? यूयं सर्वे एव मे प्रियाः। सर्वेषामेव मत्कृते महत्त्वं विद्यते यथासमयम् न तावत् कलहेन समयं वृथा यापयन्तु अपि तु मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्। तद्यथा कथितम् –

प्रजासुखे सुखं राज्ञः, प्रजानां च हिते हितम्। https://www.rajasthanboard.com
नात्मप्रियं हितं राज्ञः, प्रजानां तु प्रियं हितम्।।

(क) एकपदेन उत्तरत –

(i) केन समयं वृथा न यापयन्तु? (½)

(ii) जीवनं कीदृशं कुरुध्वम्? (½)

(ख) पूर्णवाक्येन उत्तरत –

(i) का सर्वेषां वन्यजीवानां जननी वर्तते? (1)

(ii) किं राज्ञः हितं नास्ति किञ्च हितम्? (1)

(ग) यथानिर्देशम् उत्तरं लिखत –

(i) 'दुःखम्' इति पदस्य विलोमपदं नाट्यांशे चित्वा लिखत। (½)

(ii) 'माता' इति पदस्य पर्यायपदं नाट्यांशे चित्वा लिखत। (½)

अधोलिखितानि वाक्यानि घटनाक्रमेण संयोजयत – (½×6=

(i) तदा अकस्मात् कश्चन व्याघ्रः व्याधस्य मार्गम् अवरुद्धवान्।

(ii) एकदा व्याधः अरण्ये मार्गभ्रष्टः अभवत्।

(iii) इत्थं व्याधः व्याघ्रात् स्वप्राणान् अरक्षत्।

(iv) सः प्रतिदिनम् अरण्ये आखेटं करोति स्म।

(v) कस्मिंश्चित् अरण्ये कश्चन व्याधः आसीत्।

(vi) भीतः व्याधः समीपे विद्यमानं वृक्षम् आरूढवान्।

## खण्ड –

वान् राजकीय उच्च माध्यमिक विद्यालयः, जयपुरस्य दशम्याः कक्षायाः छात्रः अंकितः अस्ति। स्वकीयं प्रधानाचार्यं ति दिनद्वयस्य अवकाशार्थम् एकं प्रार्थना–पत्रं लिखतु। (06)

अथवा

भवान सुरेन्द्र अस्ति। परीक्षा परिणामस्य विषये स्वपितर प्रति लिखिते अस्मिन पत्रे मञ्जूषाया उचितपदानि चित्वा रिक्तस्थानानि पूरयतु –

मञ्जूषा –

~~चामोदम अधिकम प्रतिशत अद्य~~ भवान नवनवति ~~परिणाम~~ [illegible] ।

जयपुरम

पूज्य पितृमहोदय

(i) ............ अतीव हर्षस्य विषय अस्ति। यत् मम वार्षिक परीक्षाया (ii) ............................ आगत। अहं नवति (iii) .................. अङ्कान् प्राप्तवान्। किन्तु इद ज्ञात्वा (iv) ............ अपिचिन्तित भविष्यति यत गणित **विषये (v)** ............................ **सुष्ठु अङ्कान प्राप्तु समर्थ** न अभवम। अद्य आरभ्य अहं (vi) .. **अभ्यासं करिष्यामि। आशासे यत (vii)** ............... भवत आशीर्वादेन च आगामि–परीक्षायाम अपि **(viii)** ...................... **प्रतिशत** अङ्कान प्राप्स्यामि। (ix) .............. – अग्रजम प्रति (x) .............. चरणस्पर्श **कथनीय।**

(xi) ............ पुत्र

(xii) ............ ।

प्र.17 अध चित्र दृष्ट्वा मञ्जूषाया प्रदत्तशब्दाना सहायतया उपवनविषये संस्कृतभाषाया लिखत – (5)

मञ्जूषा – उपवनम्, पुष्पाणि, नारी, सूर्य, खगा, आकाशे, कलरवम, राजमार्ग, बालक, बालिका, भ्रमन्ति।



अथवा

मञ्जूषाया उचितपदै ग्रीष्मावकाश इति विषये वार्तालाप पूरयत –

मञ्जूषा – गतमासे, मया, तत्र, अतिरमणीय, आवाम, मिलाव, त्व, अपश्य, अगच्छम, कदा।

विजय – अजय! ग्रीष्मावकाशे (i) ............ कुत्र अगच्छ?

अजय – विजय! अहं ग्रीष्मावकाशे अरुणाचलप्रदेश (ii) ............ ।

विजय – अहो (iii) ............ स प्रदेश।

अजय – आम, (iv) ............ याकपशुम अपश्यम।

विजय – किं त्व गोम्पामन्दिर न (v) ............ ?

अजय – (vi) ............ सह मम जननी जनक च आस्ताम।

विजय – यूय (vii) ............ तत आगच्छत?

अजय – वय (viii) ............ एव अगच्छाम।

विजय – अस्तु (ix) ............ पुन (x) ............ ।

प्र.18 अधोलिखितेषु–वाक्येषु केषाचित् चतुर्णां वाक्याना संस्कृतभाषया अनुवाद कुरुत। (1×4=0

(i) मै भी गाँव जाता हूँ।

(ii) पिता पुत्र के साथ जाते हैं।

(iii) हमे संस्कृत पढनी चाहिए।


(iv) बालक को फल अच्छा लगता है।

(v) वे सब संस्कृत बोलते हैं।

(vi) रमेश शेर से डरता है।

------------------------------------------

# राजस्थान बोर्ड की तैयारी के लिए आज ही हमारे YouTube चैनल Board Zone और Website BoardZone.in से जुड़ें।




- Chapter-wise PYQ
- Handwritten Notes
- MCQ
- Blue Print
- Model Paper
- Strategy
- etc

WHATSAPP YOUTUBE INSTAGRAM

921-6765-400

**www.boardzone.in**

Contact us : contact@boardzone.in